# Shri Krishnachaturvimshati Stotram

# શ્રીકૃષ્ણચતુર્વિંશતિસ્તોત્રમ્

## Document Information

Text title : Shri Krishnachaturvimshati Stotram 05 01

File name : kRRiShNachaturviMshatistotram.itx

Category : vishhnu, krishna, stotra, viMshati

Location : doc_vishhnu

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 05-01

Latest update : October 9, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 9, 2021

*sanskritdocuments.org*

# શ્રીકૃષ્ણચતુર્વિંશતિસ્તોત્રમ્

કેશવં કેશિમથનં વાસુકેર્નોગશાયિનમ્ ।
રાસક્રીડાવિલાસાઢ્યં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧॥

નારાયણં નરહરિં નારદાદિભિરર્ચિતમ્ ।
તારકં ભવબન્ધાનાં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૨॥

માધવં મધુરાવાસં ભૂધરોદ્ધારકં વિભુમ્ ।
આધારં સર્વભૂતાનાં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૩॥

ગોવિન્દમિન્દુવદનં શ્રીવન્દ્યચરણામ્બુજમ્ ।
નવેન્દીવરસઙ્કાશં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૪॥

વિષ્ણુમુષ્ણીષભૂષાઢ્યં જિષ્ણું દાનવમર્દનમ્ ।
તૃષ્ણાભયપ્રભેત્તારં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૫॥ (કૃષ્ણાભયપ્રભેત્તારં)

મધુસૂદનં વિધિનુતં બુધમાનસવાસિતમ્ ।
દધિચોરં મહાભાગં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૬॥

ત્રિવિક્રમં ત્રિલોકેશં ભવદાદિવિજૈર્નુતમ્ । (વૃષાદ્યદિતિજૈર્નુતમ્)
કવિં પુરાણપુરુષં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૭॥

વામનં શ્રીમદાકારં કામિતાર્થફલપ્રદમ્ ।
રામાનુજં સામલોલં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૮॥

શ્રીધરં શ્રીધરાનુતં રાધેયાદ્યૈર્નુતં હરિમ્ ।
રાધાવિડમ્બનાસક્તં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૯॥

હૃષીકેશં વિષાવાસં ભિષજં ભવરોગિણામ્ ।
તુષારાદ્રિસુતાવન્દ્યં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૦॥

પદ્મનાભં પદ્મનેત્રં પદ્માહૃત્પદ્મ બમ્ભરમ્ ।
આધ્માતમુરલીલોલં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૧॥

દામોદરં શ્યામલાઙ્ગં સોમસૂર્યવિલોચનમ્ ।
ચામીકરામ્બરધરં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૨॥

સઙ્કર્ષણં વેઙ્કટેશં ઓઙ્કારાકારમવ્યયમ્ ।
શઙ્ખચક્રગદાપાણિં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૩॥

વાસુદેવં વ્યાસનુતં ભાસુરાભરણોજ્જ્વલમ્ ।
દાસપોષણસંસક્તં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૪॥

પ્રદ્યુમ્નમામ્નાયમયં ખદ્યોતનમયાર્ચિતમ્ ।
વૈદ્યનાથં પ્રપઞ્ચાસ્યં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૫॥

અનિરુદ્ધં ધ્રુવનુતં શુદ્ધસઙ્કલ્પમવ્યયમ્ ।
શુદ્ધબ્રહ્માનન્દરૂપં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૬॥

નરોત્તમં પુરાણેશં મુરદાનવવૈરિણમ્ ।
કરુણાવરુણાવાસં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૭॥

અધોક્ષજં સુધાલાપં બુવમાનસવાસિનમ્ ।
અધિકાનુગ્રહં રક્ષં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૮॥

નારસિંહ દારુણાસ્યં ક્ષીરામ્બુધિનિકેતનમ્ ।
વીરાગ્રેસરમાનન્દં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૧૯॥

અચ્યુતં કચ્છપાકારમુજ્જ્વલં કુણ્ડલોજ્જ્વલમ્ ।
સચ્ચિદાનન્દવીર્યાઢ્યં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૨૦॥ (સચ્ચિદાનન્દરૂપેશં)

જનાર્દનં ઘનાકારં સનાતનતમં વિભુમ્ ।
વિનાયકપતિં નાથં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૨૧॥

ઉપેન્દ્રમિન્દ્રાવરજં કવીન્દ્રનુતવિગ્રહમ્ ।
કવિં પુરાણપુરુષં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૨૨॥

હરિં સુરાસુરનુતં દુરાલોકં દુરીક્ષણમ્ ।
પરેશં મુરસંહારં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૨૩॥

શ્રીકૃષ્ણં ગોકુલાવાસં સાકેતપુરવાસિનમ્ ।
આકાશકાલદિગ્રૂપં કૃષ્ણં વન્દે જગદ્ગુરુમ્ ॥ ૨૪॥

કૃષ્ણસ્તોત્રં ચતુર્વિંશમેતત્ સન્નામગર્ભિતમ્ ।
યઃ પઠેત્ પ્રાતરુત્થાય સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૨૫॥

કૃષ્ણાય વાસુદેવાય હરયે પરમાત્મને ।
પ્રણતક્લેશનાશાય ગોવિન્દાય નમો નમઃ ॥ ૨૬॥

ઇતિ શ્રીકૃષ્ણચતુર્વિંશતિસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

---

*Shri Krishnachaturvimshati Stotram*

pdf was typeset on October 9, 2021

Please send corrections to *sanskrit@cheerful.com*